A

# SAMAGRA SHIKSHA, KERALA
## Second Terminal Evaluation 2018-19

1011

First Language Paper-I , Part -I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- X**
Time 1½ Hours

Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- परिवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

**क)** वेदानां कालनिर्णयं कर्तुं प्रयतितवान् कः ?
(बालगङ्गाधरतिलकः, महात्मागान्धी, डा. एस् .राधाकृष्णः, जवहर्लाल्नेह्रु, )

**ख)** ‘ **एति** ’ इति पदस्य लकारः कः ?
(लट् , लङ्, लिट्, लृङ्)

**ग)** फलपाकान्तः सस्यविभागः कः ?
(वीरुत्, वनस्पतिः, ओषधिः, वृक्षः)

**घ)** पार्वतीपरमेश्वरविवाहपर्यन्ता कथा कस्मिन् महाकाव्ये वर्णिता?
(नैषधीयचरिते , रघुवंशे , किरातार्जुनीये , कुमारसम्भवे)

**ङ)** ‘ **बाष्पं प्रमृज्य विगतानुशयो भवामि** ’-कस्य वचनमिदम् ?
(कण्वस्य , सर्वदमनस्य, दुष्यन्तस्य, शार्ङ्गरवस्य )

**2. उदाहरणानुसारं पट्टिकां पूरयत ।** 4x1=4

| | काव्यम् | विभागः | कर्ता |
|---|---|---|---|
| उदा - | नैषधीयचरितम् | महाकाव्यम् | श्रीहर्षः । |
| | सत्यशोधनम् | आत्मकथा | ................ । |
| | क्रिस्तुभागवतम् | ................ | पि. सि. देवस्या। |
| | ................ | महाकाव्यम् | माघः। |
| | अभिज्ञानशाकुन्तलम् | ................ | कालिदासः । |

**3-6 अधोदत्तेभ्यः प्रश्नेभ्यः त्रयाणाम् उत्तराणि लिखत ।** **3x2=6**

**3. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत।**

दुर्योधनकृतं पाण्डवद्रोहं पश्यन् अनुकम्पमानः व्यासः धृतराष्ट्रम् एवम् अवदत्।

**4. अधोदत्तं श्लोकं पठित्वा गद्यक्रमे रिक्तांशान् पूरयत।**

यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षम्।
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः।।

**सूचनाः-** यूयं ....... परेषामालोकनार्थं ....... मा कार्ष्ट । एवं यदि ....... उत्तुङ्गकृपाप्रसादः ....... (भवेत्)।

**5. ' प्रत्येकं मानवस्य मनोगतयः भिन्ना एव ' इति आशययुक्तं श्लोकं चित्वा लिखत।**

**क)** इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः।।

**ख)** मयापि देयं प्रतिवाचिकं न ते
स्वनाममत्कर्णसुधामकुर्वते।
परेण पुंसा हि ममापि सङ्कथा
कुलाबलाचारसहासनासहा।।

**6. उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा -** उद्याने पाटलं नास्ति । अन्यत् सर्वम् अस्ति ।
उद्याने **पाटलात् ऋते** अन्यत् सर्वम् अस्ति ।

**क)** ग्रन्थशालायां पञ्चतन्त्रं नास्ति । अन्यत् सर्वम् अस्ति।

**7. प्रादेशिकभाषया परिवर्तयत।** **1x5=5**

2018 तमे वर्षे आगस्त् मासे केरलेषु अतिवृष्ट्या महाप्रलयं सम्भूतम्। तेन केरलेषु आबालवृद्धं जनाः बाधिताः । अनेन प्रलयेन अनेकेषां पौराणां प्राणाः सम्पदश्च विनष्टाः। तथा ' उरुल् पोट्टल् ' इति प्रतिभासोऽपि अत्र सञ्जातः । दुर्घटनाबाधितानां जनानां जीवनसंरक्षणाय अन्येषाम् आदर्शरूपेण च एकमनस्काः भूत्वा सर्वे मानवाः अहोरात्रं प्रयतितवन्तः।

**8. उदाहरणानुसारं सन्धिच्छेदं लिखत।** **1x1=1**

**उदा-** पितुरधोमुखी - पितुः + अधोमुखी।

**क)** मातुराज्ञया - ..........+ ...........।

9. उदाहरणानुसारं विग्रहवाक्यं लिखत। 1x1=1

**उदा-** कुलाङ्कुरेण - कुलस्य अङ्कुरः कुलाङ्कुरः, तेन ।

**क)** वंशाङ्कुरेण - ........................................ ।

**10. अधोदत्तं वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि चित्वा लिखत।** 3x1=3

महाराजस्य आदेशं श्रुत्वा अपि त्यागराजः राजप्रशस्तिपरां कृतिं विरच्य प्रदातुं सन्नद्धो नाभवत् ।

**11-13 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।** 2x4=8

**11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य?।।

**क)** अस्मिन् श्लोके क्रियापदं किम् ?

**ख)** माम् - इत्यनेन का उद्दिश्यते ?

**ग)** मद्वचनात् सः वाच्यः - केन वाच्यः ?

**घ)** **'अक्ष्णोः समीपम्'** इत्यस्य एकपदं लिखत।

**12. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

कैरलीसाहित्ये प्रथितयशः भवति वैक्कं मुहम्मद्बषीर् महाशयः। वैक्कं जनपदेषु तलयोलपरम्ब् नामके ग्रामे १९०८ तमे वर्षे जनुवरीमासे १९ तमे दिने सः जनिमलभत। 'बेप्पूर् सुल्तान्' इति नामान्तरेण प्रशस्तस्य अस्य पुस्तकेषु 'बाल्यकालसखी', 'पात्तुम्मयुटे आट्', 'शब्दङ्ङल्' इत्यादयः प्रमुखाः भवन्ति। १९९४ तमे वर्षे जुलै मासे पञ्चमे दिने असौ महाशयः दिवमगात्।

**क)** कः 'बेप्पूर् सुल्तान्' इति नामान्तरेण प्रशस्तोऽभवत् ?

**ख)** वैक्कं मुहम्मद्बषीर् कुत्र जनिमलभत ?

**ग)** खण्डिकातः **'अन्यत् नाम'** इत्यर्थकं पदं चित्वा लिखत ।

**घ)** वैक्कं मुहम्मद्बषीर् महाशयेन विरचिताः प्रमुखाः ग्रन्थाः के ?

13. **अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत।**

कर्णाटकसङ्गीतलोके प्रतिभाधनः केरलीयः भवति षट्कालगोविन्दमारार्। षट्सु कालेषु गातुं समर्थः इत्यतः सः षट्काल इति विशेषणं सम्पादितवान्। षट्कालगोविन्दमारार् , स्वातितिरुनाल् प्रभृतयः त्यागराजस्वामिनः समकालिकाः आसन्।

छात्रः - वन्दनं गुरो ! ............................?

अध्यापकः - कर्णाटकसंगीतलोके प्रतिभाधनः केरलीयः भवति षट्कालगोविन्दमारार्।

छात्रः - आचार्य! षट्कालगोविन्दमारार् इति नाम कथम् आगतम् ?

अध्यापकः - ........................................................ ।

छात्रः - त्यागराजस्य समकालिकाः के ?

अध्यापकः - ........................................................ ।

छात्रः - संशयनिवारणेन धन्योऽस्मि ।

अध्यापकः - .................. । पुनर्मिलामः।

**14-16 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।** **2x4=8**

14. **सूचनाः उपयुज्य सर्वदमनमधिकृत्य लघूपन्यासं लिखत।**

**सूचनाः** - अभिज्ञानशाकुन्तलम् - आश्रमजीवितम् - चक्रवर्तिलक्षणयुक्तः अबालसत्वः - सिंहशिशुना सह क्रीडा ।

15. **सूचनाः उपयुज्य लघूपन्यासं लिखत।**

**सूचनाः** – संस्कृतसाहित्यम् - पञ्चमहाकाव्यानि - कवयः - नैषधीयचरितम्- एकविंशति सर्गाः- नैषधं विद्वदौषधम् - नलदमयन्तीसम्भाषणम् ।

16. **सूचनाः उपयुज्य जीवनचरितं लिखत।**

| | | |
|---|---|---|
| नाम | - | डा. पि. के. नारायणपिल्ला । |
| जननम् | - | १९१० डिसंबर् २५, तिरुवल्ला । |
| मातापितरौ | - | गोदवर्मा लक्ष्मि अम्मा च । |
| प्रशस्तिः | - | कैरलीसाहित्यकारः, संस्कृतपण्डितः च । |
| पुरस्कारः | - | केन्द्रसाहित्य अक्कादमी, केरलसाहित्य अक्कादमी च। |
| कृतयः | - | विश्वभानुः, कैरलीध्वनिः, साहित्यकेली च। |
| दिवङ्गतः | - | १९९० मार्च् २० |

* * *